# Gayatri Hridayam

# ગાયત્રીહૃદયમ્

## Document Information

Text title : Gayatri Hridayam

File name : gAyatrI_hRRidayam.itx

Category : hRidaya, devii, gAyatrI, devI

Location : doc_devii

Author : Traditional

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Source : Gayatri Mahavijnana -Pandit Rama Sharma Acharya,

Latest update : Mar. 14, 2014

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# ગાયત્રીહૃદયમ્

ૐ નમસ્કૃત્ય ભગવાન્ યાજ્ઞવલ્ક્યઃ સ્વયમ્ભુવં પરિપૃચ્છતિ ।
ત્વં નો બ્રૂહિ બ્રહ્મન્ ગાયત્ર્યુત્પત્તિં-તુરીયાં શ્રોતુમિચ્છામિ ।
બ્રહ્મજ્ઞાનોત્પત્તિં પ્રકૃતિં પરિપૃચ્છામિ ॥ ૧॥

શ્રી ભગવાનુવાચ ।
પ્રણવેન વ્યાહૃતયઃ પ્રવર્તન્તે તમસસ્તુ પરં જ્યોતિઃ ।
કઃ પુરુષઃ ? સ્વયમ્ભૂર્વિષ્ણુરિતિ ।
અથ તાઃ સ્વાઙ્ગુલ્યા મથ્નાતિ । મથ્યમાનાત્ ફેનો ભવતિ ।
ફેનાદ્ બુદ્બુદો ભવતિ। બુદ્બુદાદણ્ડં ભવતિ । અણ્ડાત્ આત્મા ભવતિ ।
આત્મન આકાશો ભવતિ । આકાશાદ્વાયુર્ભવતિ । વાયોર્ગ્નિર્ભવતિ ।
અગ્નેરોઙ્કારો ભવતિ । ઓઙ્કારાદ્ વ્યાહૃતિર્ભવતિ ।
વ્યાહૃત્યા ગાયત્રી ભવતિ । ગાયત્ર્યાઃ સાવિત્રી ભવતિ ।
સાવિત્ર્યાઃ સરસ્વતી ભવતિ । સરસ્વત્યા વેદાઃ ભવન્તિ ।
વેદેભ્યો બ્રહ્મા ભવતિ । બ્રહ્મણો લોકા ભવન્તિ । તસ્માલ્લોકાઃ પ્રવર્તન્તે ।
ચત્વારો વેદાઃ સાઙ્ગાઃ સોપનિષદઃ સેતિહાસાસ્તેસર્વે ગાયત્ર્યાઃ પ્રવર્તન્તે ।
યથાગ્નિર્દેવાનાં, બ્રાહ્મણો મનુષ્યાણાં, મેરુઃ શિખરિણાં, ગઙ્ગા નદીનાં,
વસન્ત ઋતૂણાં, બ્રહ્મા પ્રજાપતીનાં, એવમસૌ મુખ્યઃ ।
ગાયત્ર્યા ગાયત્રીછન્દો ભવતિ ॥ ૨॥

કિં ભૂઃ ? કિં ભુવઃ ? કિં સ્વઃ ? કિં મહઃ ? કિં જનઃ ?
કિં તપઃ ? કિં સત્યમ્ ? કિં તત્ ? કિં સવિતુઃ ?
કિં વરેણ્યમ્ ? કિં ભર્ગઃ ? કિં દેવસ્ય ? કિં ધીમહિ ?
કિં ધિયઃ ? કિં યઃ ? કિં નઃ ? કિં પ્રચોદયાત્ ? ॥ ૩॥

ભૂરિતિ ભૂર્લોકો, ભુવ ઇત્યન્તરિક્ષલોકઃ, સ્વરિતિ સ્વર્લોકો,
મહરિતિ મહર્લોકો, જન ઇતિ જનો લોકઃ, તપ ઇતિ તપો લોકઃ,
સત્યમિતિ સત્યલોકઃ, ભૂર્ભુવઃ સ્વરિતિ ત્રૈલોક્યં તદિતિ

તેજો યત્તેજસોઽગ્નિર્દેવતા સવિતુરિત્યાદિત્યસ્ય
વરેણ્યમિત્યન્નમ્ અન્નમેવ પ્રજાપતિઃ । ભર્ગ ઇત્યાપઃ, આપો વૈ ભર્ગઃ ।
યદાપસ્તત્ સર્વા દેવતાઃ । દેવસ્ય સવિતુર્દેવો વા યઃ પુરુષઃ સ વિષ્ણુઃ ।
ધીમહીત્યૈશ્વર્યં, યદૈશ્વર્યં સ પ્રાણ ઇત્યધ્યાત્મં, તદધ્યાત્મમ્ ।
તત્ પરમં પદં, તન્મહેશ્વરઃ, ધિય ઇતિ મહીતિ । પૃથિવી મહી ।
યો નઃ પ્રચોદયાદિતિ કામઃ । કામ ઇમાન્ લોકાન્ પ્રચ્યાયવતે ।
યો નૃશંસઃ । યોઽનૃશંસોઽસ્યાઃ સ પરો ધર્મ ઇત્યેષા વૈ ગાયત્રી ॥ ૪॥

કિં ગોત્રા ? કત્યક્ષરા ? કતિ પાદા ? કતિ કુક્ષિઃ ? કતિ શીર્ષા ? ॥ ૫॥

સાઙ્ખ્યાયન ગોત્રા, ચતુર્વિંશત્યક્ષરા વૈ ગાયત્રી,
ત્રિપદા, ષટ્કુક્ષિઃ, પઞ્ચ શીર્ષા ॥ ૬॥

કેઽસ્યાસ્ત્રયઃ પાદા ભવન્તિ ? કા અસ્યા ષટ્ કુક્ષયઃ ?
કાનિ ચ પઞ્ચ શીર્ષાણિ ? ॥ ૭॥

ઋગ્વેદોઽસ્યાઃ પ્રથમઃ પાદો ભવતિ, યજુર્વેદો દ્વિતીયઃ સામવેદસ્તૃતીયઃ ।
પૂર્વા દિક્ પ્રથમા કુક્ષિર્ભવતિ । દક્ષિણા દ્વિતીયા, પશ્ચિમા તૃતીયા,
ઉત્તરા ચતુર્થી, ઊર્ધ્વા પઞ્ચમી, અધોઽસ્યાઃ ષષ્ઠી ।
વ્યાકરણમસ્યાઃ પ્રથમં શીર્ષં ભવતિ, શિક્ષા દ્વિતીયં,
કલ્પસ્તૃતીયં, નિરુક્તં ચતુર્થં, જ્યોતિષામયનમિતિ પઞ્ચમમ્ ॥ ૮॥

કિં લક્ષણમ્ ? કિં વિચેષ્ટિતમ્ ? કિમુદાહૃતમ્ ? ॥ ૯॥

લક્ષણં મીમાંસા, અથર્વવેદો વિચેષ્ટિતં, છન્દો વિચિતિરુદાહૃતમ્ ॥ ૧૦॥

કો વર્ણઃ ? કઃ સ્વરઃ ? શ્વેતો વર્ણઃ ષટ્ સ્વરાઃ ॥ ૧૧॥

પૂર્વા ભવતિ ગાયત્રી, મધ્યમા સાવિત્રી, પશ્ચિમા સ્નધ્યા સરસ્વતી ।
રક્તા ગાયત્રી, શ્વેતા સાવિત્રી, કૃષ્ણા સરસ્વતી ॥ ૧૨॥

પ્રણવે નિત્યયુક્તા સ્યાદ્ વ્યાહૃતિષુ ચ સપ્તસુ ।
સર્વેષામેવ પાપાનાં સઙ્કરે સમુપસ્થિતે ।
શતસાહસ્રમભ્યસ્તા ગાયત્રી પાવનં મહત્ ॥ ૧૩॥

ઉષઃ કાલે રક્તા, મધ્યાહ્ને શ્વેતાઽપરાહ્ને કૃષ્ણા ।
પૂર્વ સન્ધિ બ્રાહ્મી, મધ્ય સન્ધિ માહેશ્વરી, પરા સન્ધિ વૈષ્ણવી ।
હંસવાહિની બ્રાહ્મી, વૃષવાહિની માહેશ્વરી, ગરુડવાહિની વૈષ્ણવી ॥ ૧૪॥

પૂર્વાહ્ણકાલે સન્ધ્યા ગાયત્રી, કુમારી રક્તાઙ્ગી રક્તવાસાસ્ત્રિનેત્રા
પાશાङ્કુશાક્ષમાલા કમણ્ડલુકરા હંસારૂઢા ઋગ્વેદસહિતા,
બ્રહ્મદૈવત્યા ભૂર્લોક વ્યવસ્થિતાદિત્યપથગામિની ॥ ૧૫॥

મધ્યાહ્નકાલે સન્ધ્યા સાવિત્રી યુવતી શ્વેતાઙ્ગી શ્વેતવાસાસ્ત્રિનેત્રા
પાશાङ્કુશત્રિશૂલડમરુહસ્તા વૃષભારૂઢા યજુર્વેદસહિતા,
રુદ્રદૈવત્યા ભુવર્લોક વ્યવસ્થિતાદિત્યપથગામિની ॥ ૧૬॥

સાયાહ્ણકાલે સન્ધ્યા સરસ્વતી વૃદ્ધ કૃષ્ણાઙ્ગી,
કૃષ્ણવાસાસ્ત્રિનેત્રા શઙ્ખ-ગદા-ચક્ર-પદ્મહસ્ત-ગરુડારૂઢા
સામવેદસહિતા વિષ્ણુ-દૈવત્યા સ્વર્લોક વ્યવસ્થિતાદિત્યપથગામિની ॥ ૧૭॥

કાન્યક્ષર દૈવતાનિ ભવન્તિ ? ॥ ૧૮॥

પ્રથમમાગ્નેયં, દ્વિતીયં પ્રાજાપત્યં, તૃતીયં સૌમ્યં,
ચતુર્થમૈશાનં, પઙ્ચમાદિત્યં, ષષ્ઠં બાર્હસ્પત્યં,
સપ્તમં ભગદૈવત્યં, અષ્ટમં પિતૃદૈવત્યં, નવમમર્યમણં,
દશમં સાવિત્રં, એકાદશં ત્વાષ્ટ્રં, દ્વાદશં પૌષ્ણં,
ત્રયોદશમૈન્દ્રાગ્નં, ચતુર્દશં વાયવ્યં, પઞ્ચદશં વામદેવ્યં,
ષોડશં મૈત્રાવરુણં, સપ્તદશં વાભ્રવ્યં,
અષ્ટાદશં વૈશ્વદેવ્યં, એકોનવિંશતિકં વૈષ્ણવ્યં,
વિંશતિકં વાસવં, એકવિંશતિકં તૌષિતં,
દ્વાવિંશતિકં કૌબેરં, ત્રયોવિંશતિકં આશ્વિનં,
ચતુર્વિંશતિકં બ્રાહ્મં ઇત્યક્ષરદૈવતાનિ ભવન્તિ ॥ ૧૯॥

દ્યૌર્મૂર્ધ્નિસઙ્ગતાસ્તે, લલાટે રુદ્રઃ,
ભ્રુવોર્મેઘઃ ચક્ષુશોશ્ચન્દ્રાદિત્યૌ,
કર્ણયોઃ શુક્રબૃહસ્પતી, નાસિકે વાયુદૈવત્યે,
દન્તૌષ્ઠાવુભયસન્ધ્યે, મુખમગ્નિઃ,
જિહ્વા સરસ્વતી, ગ્રીવાસાધ્યાનુગૃહીતિઃ, સ્તનયોર્વસવઃ, બાહ્વોર્મરુતઃ,
હૃદયં પર્જન્યમાકાશમુદરં, નાભિરન્તરિક્ષં,
કટ્યોરિન્દ્રાગ્ની, જઘનં પ્રાજાપત્યં, કૈલાસમલયાવૂરુ,
વિશ્વેદેવા જાનુની, જહ્નુકુશિકૌ જઙ્ઘાદ્વયં, ખુરાઃ પિતરાઃ,
પાદૌ વનસ્પતયઃ, અઙ્ગુલયો રોમાણિ, નખાશ્ચ મુહૂર્તાસ્તેઽપિ ગ્રહાઃ,
કેતુર્માસા ઋતવઃ, સન્ધ્યાકાલસ્તથાચ્છાદનં સંવત્સરો

નિમિષમહોરાત્ર આદિત્યશ્ચન્દ્રમાઃ ॥ ૨૦॥

સહસ્રપરમાં દેવીં શતમધ્યાં દશાવરામ્ ।
સહસ્રનેત્રાં ગાયત્રીં શરણમહં પ્રપદ્યે ॥ ૨૧॥

ૐ તત્સવિતુર્વરેણ્યાય નમઃ । ૐ તત્ પૂર્વ જયાય નમઃ ।
ૐ તત્ પ્રાતરાદિત્ય પ્રતિષ્ઠાય નમઃ ॥ ૨૨॥

સાયમધીયાનો દિવસકૃતં પાપં નાશયતિ ।
પ્રાતરધીયાનો રાત્રિકૃતં પાપં નાશયતિ ।
તત્ સાયં પ્રાતરધીયાનોઽપાપો ભવતિ ॥ ૨૩॥

ય ઇદં ગાયત્રીહૃદયં બ્રાહ્મણઃ પઠેત્ અપેયપાનાત્ પૂતો ભવતિ ।
અભક્ષ્યભક્ષણાત્ પૂતો ભવતિ । અજ્ઞાનાત્ પૂતો ભવતિ ।
સ્વર્ણસ્તેયાત્ પૂતો ભવતિ । ગુરુ તલ્પગમનાત્ પૂતો ભવતિ ।
અપઙ્ક્તિ પાવનાત્ પૂતો ભવતિ । બ્રહ્મહત્યાયાઃ પૂતો ભવતિ ।
અબ્રહ્મચારી બ્રહ્મચારી ભવતિ । ઇત્યનેન હૃદયેનાધીતેન
ક્રતુ સહસ્રેણેષ્ટો ભવતિ ।
ષષ્ટિ શતસહસ્રાણિ જપ્યાનિ ફલાનિ ભવન્તિ અષ્ટૌ બ્રાહ્મણાન્
સમ્યગ્ ગ્રાહયેદર્થસિદ્ધિર્ભવતિ ॥ ૨૪॥

ય ઇદં નિત્યમધીયાનો બ્રાહ્મણઃ પ્રયતઃ શુચિઃ સર્વપાપૈઃ પ્રમુચ્યતે ઇતિ ।
બ્રહ્મલોકે મહીયતે ઇત્યાહ ભગવાન્ યાજ્ઞવલ્ક્યઃ ॥ ૨૫॥

॥ ઇતિ ગાયત્રી હૃદયં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Sunder Hattangadi

*Gayatri Hridayam*
pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*